# Shivakritam 3 Vishnu Stotram

# શિવકૃતં ૩ વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Shivakritam 3 Vishnu Stotram

File name : shivakRRitaM3viShNustotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 199/60-68||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

Shivakritam 3 Vishnu Stotram

# શિવકૃતં ૩ વિષ્ણુસ્તોત્રમ્

સ પ્રાહ મોહિનીં તત્ર નારાયણમૃતે ક્વચિત્ ।
યોગિનાં મનસો ધૈર્યં હર્તું શક્તો ન વૈ પરઃ ॥ ૬૦॥

તસ્મૈ નમો ભગવતે માયારૂપધારાય ચ ।
નમઃ કૃષ્ણાય દેવાય નારાયણાય વિષ્ણવે ॥ ૬૧॥

મોહિન્યાત્મસ્વરૂપાય મોહરૂપાય તે નમઃ ।
ત્વયિ નાત્ર મમ શોકો નારાયણે પરાત્પરે ॥ ૬૨॥

તથાપિ દેવદેવેશ રક્ષ માયાવિમોહનાત્ ।
મોહોઽયં જગતાં બન્ધકરોઽસ્તિ વાસનોદયઃ ॥ ૬૩॥

તવ યોગોઽપિ મોહાત્મા મુક્ત્યાત્મા નિર્ગુણો મતઃ ।
તવેદં રૂપમત્યર્હસૌન્દર્યભાજનં પરમ્ ॥ ૬૪॥

ન મે ચાન્યસ્ય બન્ધાય મોક્ષમાત્રપ્રદં હિ તત્ ।
તસ્માત્ત્વયા કૃતં યદ્વૈ તદ્વૈ મે લાભદં પરમ્ ॥ ૬૫॥

પાર્વત્યાઃ સહવાસેઽપિ સ્મૃત્વા ત્વાં મોહિનીં સદા ।
વિનિર્બન્ધો ભવિષ્યામિ લપ્સ્યે નૈર્ગુણ્યમેવ ચ ॥ ૬૬॥

શ્રુત્વૈતચ્છમ્ભુહાર્દજ્ઞો ભગવાન્ કમલાપતિઃ ।
યોષિદ્રૂપં ચ સંહૃત્ય ચતુર્બાહુઃ ક્ષણેઽભવત્ ॥ ૬૭॥

પ્રહસન્પ્રાહ સર્વાત્મા સમાશ્લિષ્ય હરં હૃદા ।
મદ્ભક્તો મત્કૃતાં માયાં જિતવાનસિ શઙ્કર ॥ ૬૮॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૧૯૯-અધ્યાયાન્તર્ગતં
શિવકૃતં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૧૯૯/૬૦-૬૮॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 199/60-68..

Proofread by PSA Easwaran

*Shivakritam 3 Vishnu Stotram*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*